# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-4)** **प्रश्नपत्रम् – 5** गुणाः –70

विषयः – धर्मशास्त्रम् **कोड –C.C.-2.4.7** समयः - 3 तः 6 पर्यन्तम्

दिनाङ्कः –3/04/2019 सन्दर्भग्रन्थः – याज्ञवल्क्यस्मृतिः (व्यवहाराध्याय-मिताक्षरा-सहिता)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 द्वयोः ससन्दर्भं व्याख्या कार्या।** **10**

(1) साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः।
पूर्वपक्षेऽघटीभूते भवन्त्युत्तरवादितः।

(2) दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनम्।
मध्यस्थ स्थापितं चेत्स्याद्वर्धते न ततः परम्॥

(3) तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः।
धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः॥

**प्रश्नः-2 एकस्य निबन्धात्मकमुत्तरं लिखत।** **10**

(1) अधमर्णोत्तमर्णविषयं विलिख्य ऋणादानं वर्णयत।

(2) अभियुक्तमृते निर्णयः, व्यवहारसिद्धये व्यवहारदर्शिनां बलावलञ्च विवेचयत।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 द्वयोः विवनेचना कार्या।** **10**

(1) सीमानिर्णयोपायान् लिखत।

(2) गवादिभिः परसस्यादिभक्षणे दण्डः।

(3) क्रीतानुशयस्वरूपं वर्णयत।

**प्रश्नः-4 एकस्य निबन्धात्मकमुत्तरं लिखत।** **10**

(1) ग्रामसामन्तादयान् विवर्ण्य उत्तमसाहसदण्डलक्षणं लिखत।

(2) अस्वामिविक्रयलक्षणं विलिख्य नष्टवस्तु निश्चयोपायान् लिखत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः ससन्दर्भं व्याख्या कार्या।** **10**

(1) असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च।
द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृतो भयात्॥

(2) शोणितेन विना दुःखं कुर्वन्काष्ठादिभिर्नरः।
द्वात्रिंशतं पणान्दण्डयो द्विगुणं दर्शनेऽसृजः॥

(3) समवायेन वणिजां लाभार्थं कर्म कुर्वताम्।
लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ॥

**प्रश्नः-6 एकस्य निबन्धात्मकमुत्तरं लिखत।** **10**

(1) दण्डस्य त्रैविध्यं विलिख्य केशादिलुञ्चनं वर्णयत।

(2) साहसलक्षणं विलिख्य परद्रव्यापहरणसाहसदण्डं वर्णयत।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 दशानां लघूत्तरेण लिखत।** **10**

(1) याज्ञवल्क्यस्मृतिम् अकसृत्य व्यवहारात् कः पश्येत्?

(2) कैः सह नृपः व्यवहारान् पश्येत् ?

(3) नृपः व्यवहारन् कथं पश्येत्?

(4) केन शास्त्रानुसारेण नृपः व्यवहारान् पश्येत्?

(5) याज्ञवल्क्यस्मृतेः कः कर्ता?

(6) याज्ञवल्क्यस्मृतौ कति अध्यायाः?

(7) व्यवहाराध्याये कति प्रकरणानि?

(8) ऋणादानं कति विधम्?

(9) कति प्रमाणानि?

(10) साक्षी कतिधा?

(11) सीमाक्षेत्रमर्यादा कतिधा?

(12) अभियोगः इति शब्दस्य कोऽर्थः?

(13) प्रत्ययः इति शब्दस्य कोऽर्थः?

(14) लेख्यं कतिविधम् ?

(15) किम् नाम साहसम्?